International Journal of Sanskrit Research 2018; 4(6): 89-90

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(6): 89-90
© 2018 IJSR
www.anantaajournal.com
Received: 21-09-2018
Accepted: 23-10-2018

**डॉ. तीर्थानन्द मिश्र**
एसोसियेट प्रोफेसर, संस्कृत विभाग
राजकीय मीरा कन्या महाविद्यालय,
उदयपुर, राजस्थान, भारत

**Correspondence**
**डॉ. तीर्थानन्द मिश्र**
एसोसियेट प्रोफेसर, संस्कृत विभाग
राजकीय मीरा कन्या महाविद्यालय,
उदयपुर, राजस्थान, भारत

# एको रसः करूण एव

**डॉ. तीर्थानन्द मिश्र**

**प्रस्तावना**

भारतीयसाहित्सशास्त्रे मूलभूतरसविचारचर्चा चिरकालादेव बोभूयते। यथा दर्शनशास्त्रे सृष्टिविषये विभिन्नानि मतानि दृश्यन्ते तथैव साहित्यशास्त्रेऽपि रस–मूलान्वेषणे अनेके वादाः प्रावर्तन्त। अभिनवगुप्तः भरतमुनेः नाट्सशास्त्रस्य एकां कारिकां स्वधिया व्याख्याय सर्वेषां रसानां मूलभूतं शान्तरसमेव स्वीचकार। तत्स्वरूपं ध्वन्यालोके एवमुपवर्णितं वर्त्तते।

न यत्र दुःखं न सुखं न चिन्ता न द्वेष रागो न च काचिदिच्छा।
रसः स शान्तः कलितो मुनीन्द्रैः सर्वेषु भावेषु शमप्रधानः।।

अभिनवमतेन यथा सर्वोऽयं प्रप०च एकस्माद् ब्रह्मणः प्रादुर्भूय कि०चित् कालं वर्तमानः पश्चात् तत्रैव लीयते। एवमेव एतस्माद् शवप्रधानाच्छान्तरसात् सर्वे रसा उत्पद्य मानाः अन्ततस्तत्रैव लीयन्ते। नारायणपाण्डितः क्वचित्कविकौशलकृतं क्वचिच्च रसस्वाभाव्यात् चेतोविकासात्मकं चमत्कारमनुभूय सर्वत्र अद्भुतस्यैव प्रभुत्वमंतिष्ठिपत्।

रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते।
तच्चमत्कारसारत्वे सर्वत्राप्यद्भुतो रसः।।

श्रृंगारप्रकाशकृद् भोजदेवः सर्वेषु प्राणिषु सहजतया सृष्टेः कारणतया वा सर्वेषु रसेषु श्रृंगारमेव प्रधानतया प्रत्यपादयत्। अस्मिन्नेव क्रमे स्वनामधनस्य महाकवेर्भवभूतेरऽपि करूणरसमूलकतावादः साहित्यजगति प्रसिद्धोऽस्ति। अयं महाकविः गहनभावसागरं स्वानुभूतिविवेकमन्दरेण गाढं निर्मथ्य, साहित्यसंसारे एकां नवीनामुद्भावनां प्रकटीचकार। इतः पूर्वं नाट्ये काव्ये वां श्रृंगारस्य वीरस्य च प्राधान्यमासीत् तथाहि विश्वनाथोक्तिः– 'एक एव भवेदङ्गी श्रृंगारो वीर एव वा' परं भवभूतिः शोकस्थायिभावस्य करूणरसस्यैव सर्वरस मूलकत्वमुद्धोष्य तत्प्रधानं नाट्यमपि उत्तररामचरिताख्यं प्राणैषीत्। अनेन कविना लिखितं किमपि रसशास्त्रं नोपलभ्यते नाटकत्रयमेव सम्प्रति केवलमुपलभ्यते, तत्रोत्तररामचरिताख्ये नाटके सैद्वान्तिकोऽयं श्लोको वर्त्तते–

एको रसः करूण एवं निमित्तभेदाद्
भिन्नः पृथक पृथगिव श्रयते विवर्तान्।
आवर्त बुद्बुंद्तरङ्गमयान् विकारान्
अम्भो यथा सलिलमेव हि तत् समस्तम्।।

करूणरसस्य मूलरसत्वप्रतिपादनात्पूर्वं पक्षान्तराणां विचारः संक्षेपतः क्रियते। सर्वभावानामुपशमनात् शान्तरस्य काव्यरसत्वं नानुभविकं प्रतीयते। चेतसः इयमवस्था ब्रह्मवेदिनामेव संभवति। 'न यत्र दुःखं न सुखं न चिन्तेति' निरूपितस्वरूपेण सुखात्मकत्वमपि तत्र स्पष्टं निषिध्यते। सुखात्मकत्वाभावे मूर्च्छेव रसानुभूतिः सम्पद्यते। नैषभावः सहृदयैरास्वादनीयः स्यात् तद्भावकाः विषयविरक्ता मुमुक्षव एव भवेयुः। नारायणपण्डितस्य चमत्कारवादेऽपि सकलरसमूलकत्वं न संभवति। अद्भुतरसा– नुभूतिसमये चेतोविकासात्मकः जायमानश्चितृवृत्तिविशेषः न खलु सर्वरसप्रसूर्भवितुमर्हति। चित्रवृत्तिविशेषस्यास्य रसानुभूते परिणामत्वात्। यद्यपि चमत्कारशब्दस्य साहित्यशास्त्रेषु संकीर्णे व्यापके चाऽर्थे प्रयोगः कृतो दृश्यते। तत्रैकः रसास्वादकाले जायमानः चित्तवृत्तिविशेषःअपर०च काव्यजन्यास्वादसामान्यम्। चमत्कारजनकतावच्छेदकार्थ– प्रतिपादकतासंसर्गेण चमत्कारवत्वमेव वा काव्यत्वमिति फलितम' इति

जगन्नाथस्य काव्यलक्षणे द्वितीयार्थ एवाभिप्रेतः। सर्वत्रैव अलौकिवस्तु दर्शनजन्मनः चेतोविकासाख्यस्यैव परिणामस्य स्वारस्यमवगम्यते। यथा बाला अपूर्वं वस्तु दृष्ट्वा चमत्कुर्वन्ति तथैव भावुकाऽपि विलक्षणकविकौशलेन असाधारण– शब्दार्थमयकाव्यमास्वाद्य विस्मयाविष्टा भवन्ति। एतस्मात् भावात् विच्छितिजनका–नामलङ्काराणां विकासः सम्भवति, किन्तु विविधानां भावानां विकासस्यौचित्यं बुद्धिपथं न अवतरति।

भोजराजस्य शृंगारवादे विविधानां भावनां मूलान्वेषणं सर्वथा दुष्करमेव। निष्कर्षतः एवं वक्तुं शक्यते यत् एतेषु सर्वेषु वादेषु स्वसिद्धान्ताग्रहः स्पष्टं प्रतीयते। किन्तु भवभूतेः करूणरसमूलकतावादे अतीववैज्ञानिकत्वं गभीरानुभूतिप्रभवत्वं च प्रतीयते।

करूणरसस्य स्थायिभावः शोकः दुःखं वा भवति, तद्दुःखं यद्यपि प्रतिकूलवेदनीयतया न खलु हृद्यं स्पृहणीयं वा भवति किन्त्वयमेव भावः व्यापकतमः परिणामसुखावहश्च बोभूयते। इदमेव दुःखं परमपुरूषार्थप्रयोजकतया दर्शनकारैः उच्चैः स्वरेण उदघुष्यते –

अथ त्रिविधदुःखात्यन्तनिवृत्ति : अत्यन्तपुरूषार्थः।।
दुःखत्रयाभिधाताज्जिज्ञासा तदभिघातके हेतौ।।

भगवान् बुद्धोऽपि चतुर्विधार्यसत्येषु दुःखमेव प्राथम्येन अजीगणत्। इह जगति ऋते दुःखात् सुखस्य कल्पना कर्तुमपि न शक्यते। दुःखमेव कशाभिघातैरिव सुखमधिगन्तुं मानवजीवनं निरन्तरं प्रेरयति। अतएव पुरमसुखमधिजिगिषवो महात्मानः दुःखं हेयतया न गणयन्ति, किन्तु सुखोपायतया बन्धुमिव परमादरेण स्वीकुर्वन्ति। पुण्य– परम्परया प्राप्तमिदं कलेवरं क्लेशयन्तस्तपश्चरन्ति। पार्वती मुनिजनविस्मयकारितपसा भगवन्तं शङ्करं प्राप्तवती। यथाऽन्धकारास्तित्वमन्तरेण प्रदीपालोकस्य कल्पना कर्तुं न शक्यते तथैव दुःखं विना सुखस्यानुभूतिर्न जायते।

सुखं हि दुःखान्यनुभूय शोभते, घनान्धकारेष्विव दीपदर्शनम्।

कुशकणटकितां धरामधिशयितः कुसुमकोमलशय्यासुखमनुभवितुं शक्यते। न विप्रलम्भमन्तरेण संयोगः पुष्टिमेति। अतएव नाटकेषु नायकस्य पतनं दर्शयित्वैव उत्थानं दर्शयते, विघ्नपूर्वकमेव फलावाप्तिरभिधीयते।

विविघेषु भावेषु सत्स्वपि सृष्टेरतीवोपयोगिनौ स्तः करूणार०ज्न०च तत्रापि र०जनात्पूर्वं करूणाया उपयोगितारस्ति। करूणयैव लोकरक्षणं सम्पद्यते। भक्तानां पीडया द्रवीभूतो भगवानप्यवतरति। रक्षणात्परमेव र०जनमपेक्ष्यते। क्रौ०चद्वन्द्व वियोगजन्यं कारूण्यमाश्रित्येव महाकवेर्वाल्मिकेः प्रथमा काव्याभिव्यक्तिः

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत्क्रौ०चमिथुनादेकमवधीः काममोहितम्।।

अत्र करूणायाः रक्षणात्मकः परिणामोऽपि स्पष्टं प्रतीयते। पीडितं प्रति करूणा अन्यायिनं प्रति रोषमुद्भावयति। क्रोधाभिभूतो मुनिः क्रौ०चवधकारिणं व्याधमशपत्– ''मा निषाद प्रतिष्ठान्त्वमगमः।''

मनोवैज्ञानिकाः मन्यन्ते यच्छिशूनामविकसिते मनसि द्वावेव भावौ सहजतया संतिष्ठेते – सुखं दुःख०चेति। क्रोधभयादयो भावा न तदानीमवतिष्ठन्ते। क्षुधापीडिता रोदनं कुर्वन्ति मातुः स्तन्यं पीत्वा प्रसीदन्ति च। हासोऽपि सुखस्यैवानुभावः प्रतिक्रिया वा अस्ति। पश्चात् ज्ञानस्य विकासेन सह मनोभावानामपि विकासः सम्पद्यते। अनुभवशून्यः शिशु अविदितदुःखकारणः दुःखमनुभवन् रूदति। पश्चात् बुद्धौ बोधितायां दुःखकारणे च ज्ञायमाने क्रोधादीनां भावानां विकासः संजायते। यदि समानवया बालः कश्चित् तं ताडयेत् तदा आत्मनः प्रतीकारक्षमत्वात् बालं प्रति चेतोज्वलनाख्यः क्रोधः समुत्पद्यते। यदि स्वस्मात् शक्तिमत्तरः तद् दुःखहेतुः स्यात् तदा आत्मनः प्रतीकाराक्षमत्वात् भयमुत्पद्येत्। एवमुत्सोहोऽपि दुखानुभूतेः विकासः।

दयावीरदानवीरादावपि दुःखमूलकत्वं सुखमन्वेष्टुं शक्यते। घृणास्थायिभावो बीभत्सः सुतरां दुःखात्मक इति सर्वानुभूतिगम्यम्। एवमेकस्मात् दुःखात् सर्वेषां दुःखात्मकभावानां समुत्पत्तिस्तु न दुरूहा। दुःखस्य सुखजनकत्वमपि अतीव प्रसिद्ध– मस्ति – ''न हि सुखं दुःखैर्विना लभ्यते।''

इह जगति प्रत्यक्षमनुभूयमानस्य

दुखस्य न केनाप्यपलापः कर्तुं शक्यते। लोकेऽनुभूयमानं सर्वमेवसुखं दुःखानु– स्यूतमेव संवेदनाविषयो भवति। अनुभूयमानं महदपि लौकिकं सुखं न चेतसि चिरमव– तिष्ठते। तदपेक्षया दुःखस्य चिरस्थायित्वं सर्वानुभूतमस्ति। इदमेव तथ्यं दृष्टिपथमानीय भवभूतिना उच्चैः उद्घोषितम्– 'एको रसः करूण एव'। तात्पर्यमस्ति यत् कारणसामग्रीवैलक्षण्यादेकैव दुःखानुभूतिः भिन्नां भिन्नां विकृतिं' प्राप्नोति। यथा सलिलमेकमेव सद् भ्राम्यादिरूपेण नानाभेदान् आपद्यते, तथैव करूणो रसोऽपि वैविध्यं प्रतिपद्यते।

भवभूतेरयं दुःखवादः न खलु मानवजीवने नैराश्यमुद्भावयति। किन्तु परम् सुखपथपथिकस्य साहाय्यमापादयति, गूरूरिव सत्पथे प्रेरयति, कटुकौषधमिव परिणामसुखं समुत्पादयति।

**सन्दर्भ ग्रन्थ सूची**


1. रससिद्धान्त – डॉ. नगेन्द्र, नेशनल पब्लिशिंग हाउस, नई दिल्ली (1987)
2. ध्वन्यालोक – पट्टाभिराम शास्त्री, चौ. सं. सीरिज, काशी (1940)
3. नाट्यशास्त्र – बलदेव उपाध्याय, चौ. सं. सीरिज, काशी (1929)
4. लोचन (ध्वन्यालोक टीका) चौ. सं. सीरिज, काशी (1940)
5. वाल्मीकि–रामायण – टी.आर. कृष्णाचार्य निर्णय सागर प्रेस, 1911
6. शृंगारप्रकाश – लाल प्रिंटिंग हाउस, मद्रास (1926)
7. साहित्यदर्पण – वेंकटेश्वर प्रेस, मुम्बई (1971)
8. उत्तररामचरितम् – साहित्य भण्डार, मेरठ (1991)